International Journal of Sanskrit Research 2017; 3(2): 152-154

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2017; 3(2): 152-154
© 2017 IJSR
www.anantaajournal.com
Received: 27-01-2017
Accepted: 28-02-2017

श्रीमती दीपिका
शोध छात्रा, साहित्य विभाग,
उत्तराखण्ड संस्कृत विश्वविद्यालय,
हरिद्वार, उत्तराखण्ड, भारत

**Correspondence**
श्रीमती दीपिका
शोध छात्रा, साहित्य विभाग,
उत्तराखण्ड संस्कृत विश्वविद्यालय,
हरिद्वार, उत्तराखण्ड, भारत

# कुमुदिनीचन्द्रोपन्यासे ऋतुवर्णनम्

श्रीमती दीपिका

## प्रस्तावना

प्रकृतिः मानवस्य अनन्या सहचरी अस्ति। मानवः प्राकृतिकतत्त्वैः एव जगति प्रादुर्भवति अन्ते च एतेषु प्राकृतिकतत्त्वेषु एव विलीयते। प्राकृतिकतत्त्वैः विना लोके लोकानां जीवनं न सम्भवति। मानवस्य दैनन्दिनव्यवहाराः प्रकृतेः सहयोगेन एव सम्भवन्ति। संसारे प्रकृतिः मानवश्च सहैव क्रीडन्तौ मोदमानौ स्वीयं जीवनं यापयतः। प्राकृतिकतत्त्वानां प्रादुर्भावो मानवस्यैव कृते भवति। मानवोऽपि प्रकृतेः महत्त्वं निजजीवने नितरां विजानाति। मानवो न केवलं प्राकृतिकतत्त्वानि उपभुङ्क्ते अपितु सः प्रकृतेः सौन्दर्यमपि उपासते। इदमेव कारणमस्ति यत् कवयः प्रकृतिसौन्दर्येण काव्ये नायकनायिकयोः साम्यं प्रदर्शयति।

जीवने मानवः प्रकृतेः विविधानि रूपाणि विलोकयति। प्रकृतेः साहचर्यं विना लोके मानवस्य अस्तित्वमेव न सम्भवति। कवेः काव्यमपि प्रकृतिचित्रणं विना अपूर्णमेवास्ति। प्रायेण सर्वैः कविभिः प्रकृतेः विविधानि रूपाणि स्वीये-स्वीये काव्ये यथास्थानं प्रस्तुतानि।

कविमेधाव्रतप्रणीते कुमुदिनीचन्द्रोपन्यासे प्रकृतेः रमणीयं भीषणं रूपे दृष्टिपथमायातः। प्रकृतिः मानवस्य जीवने अनन्या सहचरी अस्ति। प्रकृतिं विना सर्वेषां जीवनमपूर्णमेवास्ति। गिरयः, काननानि, उपवनानि, सरितः, तारागणाः, दिवाकरो, विभाकरः, चन्द्रज्योत्स्ना खगाः, वनलताः विविधप्रकारेण प्राणिजीवने मंगलं वितन्वन्ति। काव्यकृदां काव्ये एतानि तत्त्वानि नूनमेव विविधान् रागान् प्रपूरयन्ति।

कविना मेधाव्रतेन अपि स्वीये उपन्यासे प्रकृतेः विविधरूपाणि यथास्थानं रमणीयतया चित्रितानि। आचार्यमेधाव्रतः सूर्योदयकाले नायकेन सूर्यास्तकालं च नायिकया उपमिनोति। असौ कविवरः काव्ये विपिनानां सान्द्रतां भयानकतां मनोहरतां च सरसतया निबद्धवान्। पशुपक्षिणां मधुरः कलरवः विप्रयोगविधुराणां जनानां चेतांसि व्याकुलीकरोति। आचार्यमेधाव्रतस्य काव्ये चेत् तर्हि अयमेव कालरवः प्रियजनान् मनो रञ्जयति।

कविवरो मेधाव्रतः ऋतूनां नैसर्गिकीं सुषमां स्वभाविकतया चित्रयति। चन्द्रावती-भद्रावती-अमरावतीत्यादीनां नदीनाम् अत्यन्तरमणीयं वर्णनं पथिकानां मनांसि आहरति। कुमुदिनीचन्द्रकाव्यं निरीक्ष्य कवेः प्रकृतिचित्रणस्य नैपुण्यं सहृदयहृदयरसिकान् जनान् आनन्दयति।

चराचरस्य जगतः आदिकालादेव प्रकृतिरियं मानवस्य अनन्या सहचरी भवति। दिव्या प्रकृतिः जगतः प्राणिनो हृदयमाकर्षयति। कविना मेधाव्रतेन प्रणीते कुमुदिनीचन्द्रकाव्ये अपि प्रकृतिचित्रणस्य मनोहारिणी छटा सर्वेषां काव्यरसिकानां जनानां मनो रञ्जयति। कविः मेधाव्रतः नैपुण्येन सूक्ष्मतया च प्रकृतेः विविधाानां चेष्टाानाम् आकृतीनां च चित्रणं काव्ये अस्मिन् प्रस्तुतवान्। कुमुदिनीचन्द्रोपन्यासे नवरसानाम् अजस्रा धारा प्रवाहमाना अस्ति। कविना काव्यमिदं विविधालंकारैः विभूषितमस्ति। काव्येऽस्मिन् कविना सरलं सरसं मनोहरं प्राकृतिकचित्रणमकारि। कविना मेधाव्रतेन सर्वेषां षण्णाम् ऋतूनां मनोहरं चित्रणमत्र काव्ये कृतम्।

## ऋतुवर्णनम्

भारतदेशस्तादृशोऽद्वितीयो देशः अस्ति यत्र षट् ऋतवः स्वीयं मनोहरं स्वरूपं प्रस्तुवन्ति। न हि अन्यस्मिन् कस्मिन् अपि देशे एतेषां सर्वेषां ऋतूनां सत्ता विद्यते।

महाकविः मेधाव्रतः स्वभाविकतया प्रकृतिचित्रणं काव्ये करोति। यथा काचित् अभिनवयौवना नायिका भिन्नानि भिन्नानि परिधानानि परिधृत्य अभिनवं रूपं प्राप्नोति तथैव एभिः षड्भिः ऋतुभिः अपि प्रकृतिरियमनवरतम् अभिनवरूपे दधाति। प्रकृतेः इदमभिनवं रूपं विलोकयन्तः काव्यरसिकाः महान्तं परितोषमनुभवन्ति।

वसन्तर्तुः-

सर्वेषु ऋतुषु वसन्तः ऋतुः श्रेष्ठतमो मनोहरतमश्चास्ति। वसन्ते ऋतौ प्रकृतिरियं अभिनवे अभिरामे रूपे प्रतिभाति। कविना मेधाव्रतेन वसन्तर्त्तोः कृते नैकधा ऋतुराजपदं प्रयुक्तम्।भगवता कृष्णेन गीतायां वसन्तस्य ऋतोः कृते कुसुमाकरः पदं प्रयुक्तम्। [1] रतिकर्म न केवलं मानवानाम् अपितु सकलानां प्राणिनां स्वभाविकी प्रवृत्तिरस्ति। सकलस्य जगतो विलासो रतिकर्मण एव परिणामोऽस्ति। मदनातुराणां जनानां देवता कुसुमायुधः अस्ति। असौ कुसुमायुधः कामदेवः वसन्तस्य ऋतोः सखा अस्ति। वसन्तःऋतुः स्वीयेन मित्रेण कामदेवेन सह कामिजनेषु अधिकरोति। श्रृंगारप्रियैः सर्वैः कविभिः स्वीये काव्ये वसन्तस्य ऋतोः वर्णनं कृतम्।

कविः मेधाव्रतोऽपि स्वीये कोव्ये कुमुदिनीचन्द्रोपन्यासे वसन्तस्य ऋतोः मनोहरं स्वरूपं प्रस्तुतवान्। बसन्तस्य ऋतोः पञ्चमीतिथिः शुभा अमन्यत। एतेन कारणेन एव वसन्तपञ्चम्यां पुरोहितः काव्यनायकस्य चन्द्रसिंहस्य विवाहं निश्चितं करोति। वसन्तस्य आगमने सर्वे जनाः बसन्तोत्सवस्य मंगालायेजनस्य व्यवस्थायां व्यापृताः सन्ति-

> आसीद्दूरे सम्प्रति बसन्तपञ्चमी। ततः पूर्वमेव नगरे समारब्धाः समारम्भः। प्रासादे नगरेऽपि सकले कारूवरा विविधस्थानेषु शोभां विधाय स्वकौशलं दर्शयामासुः। [2]

प्रस्तुतायामस्यां रचनायां कविः वसन्तस्य चित्रणं स्वल्पेषु एव स्थलेषु कृतवान्। परं एतस्मिन्नल्पवर्णनेऽपि कविः वसन्तस्य सम्पूर्ण सौन्दर्य प्रस्तौति पाठकानां समक्षम्। वर्णनमधीत्य जनाः कामार्त्ताः चेतनविरहिताः एव भवन्ति। वसन्तस्य मोदप्रदं वातावरणं सर्वेषां जनानां मनांसि मोहयति-

> ''अथ माकन्दमन्दमञ्जरीमकरन्दबिन्दुवृन्दानि, स्वादं स्वादं सानन्दं, मञ्जुलमाल पन्तीनां कोकिलानां काकलोकलेन दिङ्मण्डलं मुखरयन चन्दन परिमलभृता मलयानि तेन रसालल्कि चम्पकादिमह्वीरूहालिङ्गनजनितानन्देनेव कोर कितामङ्गयष्टिका मुद्वहन्तीनां वासन्तीनां ललितलताना मुक्तमाङ्गानि मन्द मन्द मान्दोल्याङ्ग हारं शिक्षयन्निव, इन्दिरासुन्दरेन्दीवरमरन्दतुन्दिलानां मिलिन्द जालानां मञ्जुलगुञ्जनैर्निकुञ्जपुजेषु विश्रातिसुखार्थ निषण्णानां पाथ जनानां मोहनिद्रां जनयन् वन विहाय रसिक-जनमनांसि समुत्साहयन् पुष्प समयः समुपतस्ये। [3]

ग्रीष्मर्तुः-

ऋतुराजवसन्तस्य व्यतीते सति वसुधायां ग्रीष्म-ऋतोः साम्राज्यं भवति। कल्पनापि च दुष्करा एव भवति यत् वसन्ते नवपल्लवः विविधपुष्पैः च विकसिता या प्रकृतिः प्राणिमात्राय आध्यात्मिकसुखप्रदानायासक्तासीत्, कथं सा एतावती प्रचण्डीभूता। किन्तु अस्ति अयं सारतत्त्वं यत् ब्रह्मणो निर्मिते संसारे सुखेन सह दुःखं, छायया सह निदाघः, शीतेन सह उष्णता चास्ति। शिशिरमनु यस्याः प्रकृतिरूपी नायिकायाः मुखेन्दुः अनवद्यसौन्दर्येण भूषितो भूत्वा सर्वानानन्दयति स्म, स इदानीं ग्रीष्मर्तौ तपन् म्लानीभवति। शीतर्तौ यत्र जलस्पर्शमरूचिकरमासीत्, तदिदानीं ग्रीष्मे ऋतौ सुखप्रदमेव भवति। मानवः यस्य शीतलसमीरस्य स्पर्शेन आत्मानं वारयति स्म, ग्रीष्मकाले च स एव शीतलसमीरस्पर्शः सर्वान् जनानानन्दयति।

महाकवि मेधाव्रतः स्व-उपन्यासस्य आरम्भो ग्रीष्मर्तोः चैत्रमासेन एव कृतवान्। सूर्यदेवस्य प्रखरकिरणैः सरोवराः नद्यः, वृक्षाः, पक्षिणः समेऽपि तप्ताः भवन्ति स्म-

> मासोऽयं चैत्र। भगवान् भुवनभास्करः प्रखरकिरणैःर्ज्वलयन्निवाखिलं मूवलयं गगनवेदिकामारूरोह। रविकिरणानलदन्दह्यामानतनव इव वायवः परिताः। सरिदधिष्ठितनिबिडतरू-वररूचिरतरं विपिनं भवजगाहिरे बिरङ्गमकुलानि निदाघकरतेजः पुञ्जमहं मानानीव निजनिजकुलायेषु निलिल्यिरे। [4]

ग्रीष्मकाले सूर्यमरीचिभिः सन्तपन्तं चराचरजगत् प्रवहमानः उष्णो वायुरपि तापयति। एवम्भूते काले एकः पथिकः स्वेदसिक्तः व्रजन्नस्ति। कश्चिज्जनः तस्य दृष्टिपथं नायातः। वस्तुतः एतादृशे काले कोऽपि नरः स्वीयमावासं परित्यज्य न निक्रामति। एतादृशं कालं वर्णयन् आचार्यो लिखति-

> ईदृशे समये कस्मिँश्चिदनवलोक्यमान प्राणीसंचारेपरितःश्रूयमाण चलदनिलकम्पितशुष्क किसलयध्वनिवारे क्रान्तारे कश्चिदध्वगमनखेद परिश्रान्तः स्वेदोदबिन्दु वृन्दमौक्तिकजाललसितभालस्थलो विश्रमितुं प्रच्छायशीतलं स्थल मविष्यन्निवेतस्ततश्रक्षुषी क्षिपन्नेकः पथिकयुवकः प्रयाति स्म। स्तोकमन्तरं व्यतीत्यासौ पान्थं एकं धनछाय शिशिरं न्यग्रोधवृक्षमाससाद। अस्य शीतलां छायां निरीक्ष्याऽप मध्वनीनोऽतितरां जहर्षः विसस्मार च मुहूर्त्तमेकमात्मनः खेदम्। [4]

यत्रायं ऋतुः शरीरं सन्तापयति तत्रैव वृक्षाणां सान्द्रछाया अस्मिन्नेव ऋतौ शरीरं सन्तोषयति। शीतलसमीरप्रवाहोऽस्मिन्नृतौ आनन्दप्रदो भवति-

> आसीदूतुरेष ग्रीष्मः तत्रापि मध्याह्नसमयोऽयमिति वहिः प्रचण्डश्रण्ऽकरतापः। परमिह विस्मारककेलिकुञ्जेमहीरुहद्राण सान्द्रच्छाया तया शीतल तरोऽनिलोबहति स्म। अमन्दशी तलतया प्रभञ्जनस्य बुभुक्षितोऽयं रणवीरो भुवि बिलुद्वनसकमालंमव निद्रयाऽऽलिङ्गितः। अहम्? यस्यच्छिक्कसमक्षणेव शतशोऽनुचराः संभ्रान्तमनसः प्रधावमाना आगच्छन्ति स्म। [5]

वर्षर्तुः-

वसन्तसममेव वर्षर्तुरिति महाकवेः ध्यानमाकर्षयति। मेघानां गर्जनम्? चपलदामिन्याः चञ्चलदर्शनम्, मयूराणां मधुरनृत्यम्, कं सहृदयजनं नानन्दयति। कविवृन्दाः वर्षाणां मनोहररूपे मुग्धाः सन्तः तस्याः भावपूर्ण वर्णनं सदैव कृतवन्तः। वाल्मीकिकालिदासादीनामपि मनो वर्षावर्णने

आनन्दमनुभवति। आचार्य: मेधाव्रतोऽपि वर्षर्तु: मनोहारि वर्णनं कृतवान्। ग्रीष्मर्तो: समाप्तिकाले याते नभसि श्यामाभ्रा: मेघा: गर्जनं कुर्वन्ति। मेघमाला मरीचिमालिमपि घनच्छन्नं कुर्वन्ति। कवि: मेधाव्रत: अस्य ऋतो: हृदयाग्राहि वर्णनं कृतवान्-

'कालोऽयं कलितककुभोल्लासलीलानां सलीलानां प्रकटिधनधनाऽम्बराणां कृताखिलहर्षवर्षाणां वर्षाणाम्। अस्ति चापराह समय:। परमद्य मार्त्तण्डमण्डलं न ताट्टगावृतं मेधमालयां। अभिनवं पुरन्दरगोपमण्डिता हरिततृणकन्दलमयी केदार वसुन्धेरयं दिनेद्रकिरणं प्रभावलीभि: किमपि रमणीयं कलयति। मन्दारदामक्रान्तिं कलयन्ती कचिन्नीलाम्बुदावलौ मधोऽध: पतन्ती चारू बलाक श्रेणी मधुर कलखं कुर्वाणा प्रेक्षकाणां मनोनन्दयति। केदानभुवि स्वकार्य तत्पराणां क्षेत्रपाल, कान्यं मण्डली सानन्दं गायति। ग्राम्य गीति- कावलीम्। कचिदिन्द्रगोपविचित्रितायां नूतनशाद्वललतितायां रूचिरोपवन सुन्धरायां जलद मृदङ्गानाममन्दमन्द मञ्जूलं नादमाकर्ण्य चन्द्र किकदम्बकं प्रफुल्लकेकारवं कुर्वन् निजचारू कलापवृन्दं प्रसार्य सानन्दं नृत्यति। भगवान् दिवाकर: जनयतितराम्। हरिततृणाशनपीवखपुवां गवेन्द्रगोवृन्दवलीविर्दमहिषादिपशूनां सन्दोहो दर्भाङ्कुरान् कवलयन् सहर्ष मरण्यानीस्थलीषु विचरति। [6]

वर्षतौ नभोमण्डलं मेघमालाभिराक्रान्तं चञ्चलदामिन्या विद्योतते। वायुतरङ्गै:, शीतलता व्याप्तास्ति। सर्वत्र अभ्रानां नीचै: पिपासव: चातक: जलमभिलसन्ति। अयम् ऋतु: समेषां मनोग्राहि वर्तते-

ऋतुरेष निराकृत दिवाकरस्त्विष: समेधितभेककुलहृष: प्रशमितचातककदम्बकर्तृष: संपतदग्धबुधरोदर निर्मलनीरविप्रुष: प्रावृष:। उत्तुङ्गशैलमालाकारविडम्बिमिर्नीलनीलैर्गजेन्द्रमञ्जुलैरभिनवजल गम्भीर गर्भ निर्धोषनिरन्तरैश्रञ्चच्चामीकररूचिर क्रान्तिजित्वर चञ्चलाच मत्कृतिमनोहरै: प्रकटितपुरन्दरकार्मुक सुन्दरैरधोगामिबलाक-पङ्क्तिचन्दिरैमनोर मदिरा मन्दिरैरम्भोधराडम्बरैराच्छादितमखिलमम्बरतलम्। निजगम्भीर गार्जितैर्मदयन्ती मयूरवृन्दममन्दं कचिदन्तरान्तरा वर्षति बहुधारा सारं सान्द्रनीला मेधमाला। दिनेऽपि कर्हिचन काले समुल्लसतितरां सचमत्कारं तडिल्लता दिगन्तरालेषु। इदानीमेव वृष्टिर्मवित्रीति सम तर्क्यत जनै:। क्षणानन्तरमेव क्रमुकफलविशालैर्बिन्दुजालैरमिवर्षितुमारम्भि समूसलधारमभितोऽरण्ये कादम्बिनी कदम्बकै:। जलमयमीव भासते स्म सकलं महीतलम्। अस्मिन्नृतौ वनानि महारमणीयानिसमवालोक्यत स्थले स्थले हरित् तृणाङ्कुरमयी पुरन्दरगोपरमणीया धारिणीरा लोभ्यते स्म। जगन्नियामकेन प्रजापति ना सुन्धरायां नैसर्गिकनिसर्गसुन्दरं विविध वर्ण मनोरहं चित्राम्बरमास्तीर्णमिववेति, कल्पनाऽऽविर्भवति सर्वेषामपि सचेतसां हृदि। काननेऽस्मिन् कोकिलकीरकपोतसारिका नीलकण्ठमयूर चातकचक्रवाककारण्डवजलहंसप्रमुखा: पतङ्ग वरा-निजमञ्जुलकलखैर्मनोहरन्तितलं मनस्विनामपि। [7]

वसन्तेन सहैव श्रावणमास: विद्यते। एतस्मिन् काले वर्षा कदाचित् शनै: कदाचिच्च तीव्रगत्या भवति। सन्तापयत्यमृतु: विरहविधुरान् जनान्। काव्यस्य नायक: चन्द्रसिंह: नायिका कुमुदिनी च उभावपि परस्परं विरहिणौ स्त:। ऋतुरयं तौ सन्तापयति। आचार्यवर्यै: विरहविधुरयोरनयो: जनयो: श्रावणमासस्य च मनोग्राहि वर्णनं कृतम् कृतम्-

मासोऽयं श्रावण:। कदाचित्क्कचिन्मेघमाला सझर्झरखं वर्षति। कर्हिचिद् प्रशमं प्राप्नोति वृष्टि:। अन्तरिक्षतलं जीमूतजाललतितमालोक्यते। अभिनवसलिलपूर्णानि सरांसिकामपि शोभां पुष्णान्ति। झर्झरखबधिरितादिगन्तरा: पर: सहस्त्रा: ससरन्ति पार्वतानिर्झखारा: परित: पर्वतपरिसरारण्यस्थलीषु। जलधरपटलनिलीनोऽपि रविरयमतितीव्रतापं तनुते। ईदृशे समये प्रिया विरहविक्षिप्तमना उन्मत्त इवासौ चन्द्रसिंहो मन्दमन्दं प्रचलन्नेव कस्याश्रन गिरिनिर्झनिर्झ रिण्यास्तीरमुपाजगाम। तत्रागत्यासौ मुहूर्त विश्रमितुं विचिन्त्य वासांस्यवतार्य शैवलिनया निर्मलसलिले स्नानं व्यधात्। येन क्रान्ति किञ्चिन्निरस्य तनुशान्ति सुखमयं लेभे। [8]

समासेन वक्तुं शक्यते यत् कवि: मेधाव्रत: कुशलतया काव्ये सर्वेषामृतूनां वर्णनं कृतवान्। न हि काव्ये कुत्रचित् अनावश्यकम् ऋतूनां वर्णनं कविना अकारि। काव्ये क्वचिदपि रसप्रवाहे हानिर्न भवति प्राकृतिकचित्रणेन, सर्वत्र एव काव्ये रसधारा अजस्ररूपेण प्रवाहमाना अस्ति।

## संदर्भ सूची


1. प्रथमकला पृ0 12
2. चतुर्थी कला पृ0 45
3. प्रथमकला पृ0 11
4. प्रथमकला पृ0 1
5. प्रथमकला पृ0 1
6. नवमी कला पृ0 125
7. पञ्चमी कला पृ0 67
8. एकादशी कला पृ0 153-154
9. प्रथमकला पृ0 1